National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2026;** 1(64): 85-87
© 2026 NJHSR
www.sanskritarticle.com

**Shankar datta Joshi**
Research scholar in education,
National Sanskrit University,
Tirupati A.P

**Correspondence:**
**Shankar datta Joshi**
Research scholar in education,
National Sanskrit University,
Tirupati A.P

# अष्टावक्रगीतायां निहितसामाजिकतत्त्वानि
# A Study of Social Elements in Ashtavakragita

**Shankar datta Joshi**

**सारांशः –**

भारतीय दर्शने अष्टावक्रगीता अद्वितीयः ग्रन्थः अस्ति, यस्मिन् राजा जनकः तथा च ऋषि अष्टावक्रस्य संवादमाध्यमेन आत्मज्ञानस्य गूढतत्त्वानां निरुपणं कृतमस्ति। यद्यपि एतस्य स्वरुपम् आध्यात्मिकं वर्तते, परञ्च एतस्य सिद्धान्ताः मानवस्य सामाजिकव्यवहारं, मूल्यबोधं तथा जीवनदृष्टिम् उत्कृष्टरुपेण प्रभावयन्ति। शोधपत्रमेतत् इदं तथ्यमपि स्पष्टं करोति यत् आत्मज्ञानानुभूतिः सामाजिकजीवनमपि सुदृढं, नैतिकं, मानवीयञ्च गुणान् विकासयति।

**उपोद्घातः-**

पाश्चात्याकर्षाधुनिकतामाश्रित्य यदा मानवेन स्वजीवनरीतिपरिवर्तिता तदारभ्य मानवमूल्यानां ह्रासः दरीदृश्यमाणः वर्तते। विगतत्रिंशत्वर्षेभ्यः विश्वस्थितिः परिवर्तिता, दिग्भ्रमिता च वर्तते, येन वैज्ञानिकविचाराणां समावेशः जातः। वैज्ञानिकमाधारिकृत्य धार्मिक- आध्यात्मिक – सामाजिक- क्रियाणाञ्च तुलना जाता। धार्मिकविश्वासेषु अन्धविश्वासस्य मेघः समागतः। समवयवकाले सौन्दर्यबोधः, गुणवत्ता, संवेदनाः, अनुभूतिः, आत्मचेतना, अन्तर्बोधादि लक्षणानां ह्रासः दृश्यते।

वैज्ञानिकविषयान् प्रति विश्वासः, भौतिकवादोपरि आस्था एतेषां विषये अत्याधिकावधानकारणात् दिनानुदिनं मानवता ह्रासोपरि चिन्तानवधानः प्रदत्तः। स्वत्रुटिनिराकरणे, मानवतादिगुणसम्पादने, स्वस्य पुनर्स्थापनेऽसमर्थो जातश्च सः। स्वास्तित्वं विनाशितं मानवेन, सुविधावाप्य व्यर्थम् अनैतिककृत्याचरणेन संस्कृतिः, समाजः, धर्माच्च विच्युतो जातः। जीवनस्य परमं लक्ष्यं विस्मृतम्। स्वावगमनं, प्रयोजनं जीवनस्य, स्वधार्मिक- सामाजिक – सांस्कृतिकविषयाणाञ्च महत्वं न स्वीकरोति। आध्यात्मिकज्ञानं विस्मृत्य शक्त्यार्थश्च मदयुक्तो भूत्वा इतस्ततः सञ्चरति। सर्वाणि एतानि कारणानि आध्यात्मिकपाथेये कण्टकवत् अवरोधं जनयन्ति।

अष्टावक्रगीता भारतीय अद्वैतवेदान्तपरम्परायाः महत्वपूर्णदार्शनिकग्रन्थः अस्ति। यस्य मुख्योद्देश्यम् आत्मबोधः, एवं संन्यासप्रधानग्रन्थः वर्तते, परञ्च गूढाध्ययनेन स्पष्टं भवति यत् अस्यां निहिततत्त्वानि सामाजिकजीवनमपि प्रभावयन्ति। शोधपत्रेऽस्मिन् अष्टावक्रगीतायां प्रतिपादितसामाजिकतत्त्वानि, यथा- समता, स्वतंत्रता, अहङ्कारमुक्तिः, आडम्बरविरोधः, करुणा तथा सामाजिकबन्धनात् मुक्तिः इत्यादि विषयाणां विश्लेषणं प्रस्तूयते, एतेन सह आधुनिकसमाजे तेषां प्रासङ्गिकतां प्रतिपादयति।

**पारिभाषिकशब्दावली –**

अष्टावक्रगीता, सामाजिकतत्त्वानि, अद्वैतवेदान्तः, समता, सामाजिकचेतना च।

**अष्टावक्रगीता तथा दार्शनिकाधारः –**

अष्टावक्रगीता अद्वैतवेदान्ततत्त्वेष्वाधारितं वर्तते। अस्मिन् ब्रह्मणः तथा आत्मनः ऐक्यत्वं स्वीकृतमस्ति। यदा व्यक्तिः एनाम् एकतां स्वीकरोति, तदा सामाजिकभेदभावः, निम्नं -उच्चं, जातिः-वर्गः, पद-प्रतिष्ठा इत्यादीनि तत्त्वानि स्वतः निरर्थकमिति अवगच्छति। एतदेव दार्शनिकाधारः सामाजिकसमरसतायाः बिजारोपणं भवन्ति।

**सामाजिकसमतायाः सिद्धान्तः –**

**न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोचरः।**
**असंगतोऽसि निराकारो विश्वसाक्षी सुखी भव।।[1]**
**एको विशुद्धबोधोऽहमिति निश्चयवह्निना।**
**प्रज्वाल्याज्ञानगहनं वीतशोकः सुखी भव।।[2]**

अष्टावक्रगीतायाः एकं प्रमुखं तत्त्वं समता वर्तते। वर्णनेऽस्मिन् उक्तमस्ति- आत्मा सर्वस्मिन् समानम् अस्ति – "न त्वं विप्रः, न क्षत्रियः, न वैश्यः, न शूद्रः अपितु शुद्धचैतन्यस्वरुपम् ।"

विचारः एषः सामाजिकसमानतां, जातिगतभेदभावान्, वर्गविभाजनम् इत्यादयः समस्यां परिहरति, तथा समतामूलकसामाजिक-समरसतायाः परिकल्पना करोति।

**सामाजिकबन्धनात् विमुक्तिः –**

**न त्वं देहो न ते देहो भोक्ता कर्ता न वा भवान्।**
**चिद्रूपोऽसि सदा साक्षी निरपेक्षः सुखी भव॥[3]**

ग्रन्थे वारं -वारं सामाजिकाडम्बरः, रुढिवादी धारणाः, कृत्रिममान्यता इत्यादि विषयान् त्यक्त्वा मुक्त्यावस्थां प्राप्तुं प्रेरणां ददाति। अष्टावक्रानुसारेण व्यक्तिः तावत् मुक्तः न भवति यावत् सामाजिकरुढिबाह्याडम्बरविषयेभ्यः विमुक्तः न भवति, यावत् एताभिः भावनाभिः ग्रस्तः वर्तते। विचारः एषः समाजे मानसिकस्वतंत्रतां, आत्मसम्माननं, वैचारिकस्वाधीनतां प्रोत्साहयति।

**अहङ्कारमुक्तिः तथा सामाजिकसौहार्दम् –**

**मानापमानयोस्तुल्यं सुखदुःखेषु निष्पृहः।**
**न च चिन्तयते किञ्चित् स वै मुक्तः स पण्डितः॥[4]**
**अहं कर्तेति यो भावो दुःखस्य मूलमुच्यते।**
**तस्मात् कर्तृत्वभावेन जहि शान्तिमवाप्नुहि॥[5]**

अहङ्कारः सामाजिकसङ्घर्षाणां प्रमुखं कारणं भवति। अष्टावक्रगीता अहङ्कारस्य पूर्णत्यागोपरि उपदेशं करोति। यदा व्यक्तिः "अहं तथा मम" इत्यादि भावान् त्यजति, तदा समाजे द्वेषः, ईर्ष्या तथा सङ्घर्षः स्वतः विनष्टः भवति। इत्थं प्रकारेण ग्रन्थः सामाजिकसौहार्दः एवं शान्तेः दार्शनिकाधारं प्रददाति।

**कर्मः तथा समाजम् –**

**न कर्ता न च भोक्ता न बन्धो न च साधनम्।**
**न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥[6]**

अष्टावक्रगीता निष्कामभावेन कर्मः कर्तुं प्रेरयति। अस्यां कर्मः बन्धनस्य कारणं न स्वीकृतम्, अपितु चेतनसाक्षिभावेन कृतकर्मः उक्तः। दृष्टिरेषा सामाजिककर्तव्यान् भाररुपेण न स्वीकरोति, अपितु सत्दायित्वरुपेण स्वीकरणस्य प्रेरणां प्रददाति।

**करुणा एवं मानवीय मूल्यम् –**

**यथैवक्षुरसे क्लृप्ता तेन व्याप्तैव शर्करा।**
**तथा विश्वं मयि क्लृप्तं मया व्याप्तं निरन्तरम्।।[7]**

यद्यपि अष्टावक्रगीतायां करुणायाः प्रत्यक्षोपदेशं न्यूनं दरिदृश्ते, परञ्च आत्मनः सर्वव्यापकतायाः बोधः स्वयमेव करुणां जनयति। यदा सर्वेषु एकात्मदर्शनं भवति, तदा हिंसा, शोषणं तथा अन्यायस्य कृते स्थानमपि न भवति। एतत् मानवीय मूल्यानां सुदृढता स्थापयति।

**आधुनिकसमाजे प्रासङ्गिकता –**

**यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत्।**
**आनन्दपरमानन्दः स बोधः क्वास्ति शोच्यता॥[8]**
**येन दृष्टं परं ब्रह्म सोऽहं ब्रह्मेति चिन्तयेत्।**
**किं चिन्तयेत् निश्चिन्तो द्वितीयं यो न पश्यति।।[9]**

आधुनिकसमाजः तन्यता, प्रतिस्पर्धा, भौतिकवादः तथा सामाजिक-विभाजनात् ग्रसितः अस्ति। अष्टावक्रगीतायाः सामाजिकदृष्टिकोणः व्यक्तिम् आन्तरिकस्वतंत्रता दत्त्वा सामाजिकजीवने संतुलनं, सहिष्णुता एवं समरसता इत्यादि भावान् स्थापयितुं सह करोति।

**निष्कर्षः (उपसंहारः) –**

अष्टावक्रगीता केवलम् आध्यात्मिकमुक्तिः साधनस्य ग्रन्थः नास्ति, अपितु अस्यां सामाजिकचेतना निहिता वर्तते।समता, स्वतंत्रता, अहङ्कारमुक्तिः तथा सामाजिकबन्धनात् मुक्तिः सदृशानि तत्त्वानि आधुनिकसमाजस्य कृते अत्यन्तं प्रासङ्गिकं भवति। इत्थं प्रकारेण अष्टावक्रगीता एकम् आदर्शसामाजिकदर्शनस्य प्रकटीकरणं करोति।

**सन्दर्भग्रन्थसूची –**

1. शंकराचार्य. (संभावित). अष्टावक्र गीता भाष्य. वाराणसी: चौखम्बा संस्कृत संस्थान।
2. स्वामी नित्यानन्द गिरि. (2005). अष्टावक्र गीता (संस्कृत पाठ, हिन्दी अनुवाद एवं टीका). वाराणसी: चौखम्बा सुरभारती प्रकाशन।
3. स्वामी चिन्मयानन्द. (2010). अष्टावक्र गीता: आत्मबोध का दर्शन. मुंबई: सेंट्रल चिन्मय मिशन ट्रस्ट।

4. ओशो. (2004). अष्टावक्र गीता: महागीता (भाग 1– 10). पुणे: ओशो इंटरनेशनल फाउंडेशन।
5. स्वामी तेजोमानन्द. (2012). अष्टावक्र गीता: सरल व्याख्या. मुंबई: चिन्मय प्रकाशन।
6. ब्रह्मचारी श्रीराम. (1998). अष्टावक्र गीता: अद्वैत वेदान्त की व्याख्या. ऋषिकेश: कैलाश आश्रम प्रकाशन।
7. रामसुखदास. (2001). अष्टावक्र गीता: तात्त्विक विवेचन. गीता प्रेस, गोरखपुर।
8. राधाकृष्णन्, सर्वल्ली, भारतीय दर्शन, खण्ड -2 ।
9. शर्मा, चन्द्रधर भारतीय दर्शन की रुपरेखा।
10. उपाध्याय, बलदेव, वेदान्त दर्शन का सामाजिक प्रभाव।

**सन्दर्भाः**

[1]अष्टावक्रगीता- प्रथमोऽध्याय- श्लोकः-5.

[2]अष्टावक्रगीता- प्रथमोऽध्याय- श्लोकः-9.

[3]अष्टावक्रगीता- प्रथमोऽध्याय- श्लोकः-4

[4]अष्टावक्रगीता 18/3

[5]अष्टावक्रगीता 6/1

[6]भाव-सार 18/20

[7]अष्टावक्रगीता 2/6

[8]अष्टावक्रगीता 15.8

[9]अष्टावक्रगीता 18/16